संस्कृत-वार्ता:
14.08.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- स्वातन्त्र्यदिवसस्य पूर्वसन्ध्यायाम् अद्य राष्ट्रपतिपदासीना द्रौपदीमुर्मु: राष्ट्रं सम्बोधिष्यति।
- स्वातन्त्र्यदिवसस्य अवसरे आरक्षक-अग्निशामक-गृहरक्षक-नागरिकरक्षा संशोधनसेवानां च सप्तत्रिंशदधिकैकसहस्रं कर्मचारिणः वीरता-सेवा-पदकाभ्यां पुरस्कृताः जाता: ।
- सर्वोच्चन्यायालयेनाद्य स्पष्टीकृतं यत् प्रत्येकं राज्यम् अधुना आकरजाधिकारेषु अवशिष्टकरं प्रत्यावर्तयितुं शक्नोति।
- राष्ट्रपति: द्रौपदी मुर्मू: अस्मै वर्षाय ग्रीष्मकालिक-अमृतोद्यानस्य उद्घाटनं राष्ट्रपति-भवने कृतवती। उद्यानमिदं सामान्यजनेभ्य: शुक्रवासरादेव उद्घाटयिष्यते।
- जापानदेशस्य प्रधानमन्त्री फुमियो किशिदा इत्येष: आगामिमासे स्वपदात् त्यागपत्रं दास्यति।
- थाईलैण्डदेशस्य संवैधानिक-न्यायालयेन प्रधानमन्त्री स्रेत्था-थाविसिन् इत्येष: पदात् निरस्तीकृत:।

<u>हर घर तिरङ्गा-अभियानस्य</u>

श्वः राष्ट्रम् अष्टसप्ततितमं स्वातन्त्र्यदिनम् आचरिष्यति। प्रधानमन्त्री नरेन्द्रमोदी दिल्ल्याः रक्तदुर्गस्थलात् स्वातन्त्र्यदिनाचरणे देशस्य नेतृत्वं करिष्यति। तत्र असौ त्रिवर्ण ध्वजारोहणं कृत्वा राष्ट्रम् संबोधयिष्यति। स्वातन्त्र्यदिवसस्य पूर्वसन्ध्यायाम् अद्य राष्ट्रपतिपदासीना द्रौपदीमुर्मु: राष्ट्रं सम्बोधिष्यति। राष्ट्रपतेः राष्ट्रसम्बोधनम् अद्य सायं सप्तवादनतः राष्ट्रियप्रसारणप्रणालिकाम् समेत्य आकाशवाणी-दूरदर्शनयो: च सर्वप्रणालिकाभिः हिन्दी-आङ्ग्लमाध्यमेन च प्रसारयिष्यते। प्रादेशीयभाषामाध्यमेनापि इदं प्रसारणं सम्बोधनं च अद्य सार्धनववादने सायंकाले श्रोतुं शक्यते।

<u>वीरता पुरस्कारा</u>:

स्वातन्त्र्यदिनस्य अवसरे आरक्षकस्य, अग्निशामकस्य, गृहरक्षकस्य, नागरिकरक्षायाः संशोधनसेवानां च सप्तत्रिंशदधिकैकसहस्रं कर्मचारिणः शौर्य-सेवा-पदकैः च पुरस्कृताः जाता:। तेलङ्गाना-आरक्षिबलस्य हेड्कान्स्टेबल इत्यस्मै चादुवु यादवाय वीरताया: कृते राष्ट्रपतिसम्मानं प्रदत्तं ।

गृहमन्त्रालयः अवदत् यत् त्रयोदशाधिकद्विशतं कर्मचारिणः वीरतापुरस्कारेण पुरस्कृताः सन्ति इति। अपि च विशिष्टसेवायै चतुर्णवति राष्ट्रपतिपदकेषु पञ्चसप्ततिः आरक्षिसेवाभ्यः अष्ट अग्निशमनसेवाभ्यः अष्ट नागरिकसुरक्षाभ्यः गृह रक्षकसेवाभ्यः च अथ त्रयः संशोधनात्मकसेवाभ्यः एते पुरस्काराः प्रदत्ताः | नव विंशत्यधिक सप्त शतं कर्मिणः प्रशंसनीयसेवायै सम्मानिता: अभवन् ।

<u>सर्वोच्चन्यायालय-कर:</u>

सर्वोच्चन्यायालयेनाद्य स्पष्टीकृतं यत् प्रत्येकं राज्यम् अधुना आकरज-अधिकारेषु अवशिष्टकरं प्रत्यावर्तयितुं शक्नोति। अवधेयं वर्तते यत् पञ्चाधिकद्विसहस्रतमवर्षस्य अप्रैलमासस्य प्रथमदिनाङ्कात् पूर्वम् एते आकरजाधिकारा: क्रियान्विता: न जाता:। शीर्षन्यायालयेन जुलाईमासस्य पञ्चविंशे दिने अयमादेश: प्रदत्त: यत् राज्यानां पार्श्वे तादृशी शक्ति: वर्तते यया तानि राज्यानि आकरजाधिकारेषु करं प्रभाविकर्तुं शक्नुवन्तीति।

<u>अमृत-उद्यान</u>

राष्ट्रपति: द्रौपदी मुर्मू: अस्मै वर्षाय ग्रीष्मकालिक-अमृतोद्यानस्य उद्घाटनं राष्ट्रपति-भवने कृतवती। उद्यानमिदं जनसामान्येभ्य: शुक्रवासरात् सितम्बरमासस्य पञ्चदशदिनांकपर्यन्तं उद्घाटितं भविष्यति। अत्र बालानां मनोरञ्जनाय विभिन्नानि उपकरणान्यपि स्थापितानि सन्ति। एकोनत्रिंशदगस्ते क्रीडादिवसावसरे अमृतोद्यानम् विशेषत: क्रीडकेभ्य:, बालेभ्य: विद्यालयीयशिक्षकेभ्यश्च उद्घाटितं स्थास्यति।

<u>शाह-हरघरतिरंगा</u>

केन्द्रीय-गृहमन्त्री अमितशाह: अद्य हरघरतिरङ्गेति अभियानन्तर्गतं स्वातन्त्र्यदिवसावसरे नवदेहल्या: स्वकीये गृहे त्रिवर्णध्वजम् उत्तोलितवान्। एकस्मिन् सामाजिक-प्रसारतन्त्रजाले प्रसारित-सन्देशे श्रीशाह: उक्तवान् यत् स्वगृहे राष्ट्रध्वजं समुत्तोल्य वीरबलिदातृभ्य आदरभावा: समर्पितव्या:, येषां सर्वस्वबलिदानेन अस्माभि: स्वातन्त्र्यसुखं लब्धम्। अभियानमिदं श्वस्तनं यावत् प्रचलिष्यति। यत्र जना: प्रतिगृहं राष्ट्रध्वज-समुत्तोल्य बेवकफलकेषु स्वकीयानि छायाचित्राणि प्रतिस्थापयिष्यन्ति।

## सिक्किम-वृक्षारोपणभियानम्

बीआरटीएफ इति विशिष्टोपसैन्यबलदलेन स्वस्तिक-परियोजनान्तर्गतं बृहत्परिमापे एक-पेड़-मां-के-नाम इत्यभियानान्तर्गतं सिक्किमप्रदेशे वृक्षारोपणाभियानं परिचालितम्। अभियानमिदं स्वतन्त्रतादिवसोपलक्ष्ये द्रुततया समायोज्यते। विशेषत: अभियानस्यास्य सघनता ऐशान्यसिक्किमे, चीनदेशस्य सीम्नि च आधिक्येन दृश्यते।

## प्रधानमन्त्री-विभाजनविभीषिकादिवस:

अद्य विभाजनविभीषिकास्मृतिदिवसो विद्यते। अयं दिवस: सप्तचत्वारिंशदधिक नवदशतमवर्षस्य विभाजनसमये विस्थापितानां प्रवासिनां च जनानां स्मरणे आमान्यते। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी एकेन सामाजिकसन्देशेन तान् असङ्ख्यजनान् स्मृतवान्। ये विभाजनावधौ पीडिता: प्रभाविता: च जाता:। अवधेयं वर्तते यत् प्रतिवर्षम् अगस्तमासस्य चतुर्दशदिनाङ्के प्रशासनेन एकविंशत्यधिक-द्विसहस्रतमे वर्षे विभाजनविभीषिकादिवसत्वेन मानयितुं निर्णय: निर्णीत:।

## जम्मू-कश्मीर

जम्मू-कश्मीरराज्ये सेनया सह आततायिनां जाते एकस्मिन् संघट्टे एक: सेनानायक: वीरगतिम् अलभत् चत्वारश्च क्रूरकर्माण: यमलोकं गोलिकाभि: प्रेषिता:। सङ्घट्टोऽयं डोडाजनपदे अभवत्। आकाशवाण्या: वार्ताहरेण प्रोक्तं यत् सङ्घट्टेऽस्मिन् कतिचन सामान्यनागरिका: व्रणिता: सन्ति।

## जयन्त: कौशलम्

केन्द्रीयकौशलविकासमन्त्री जयन्तचौधरी इत्यसौ उक्तवान् यत् प्रौद्योगिकीनाम् अथ च कृत्रिममेधाया: प्रारम्भादेव देशे राष्ट्रियप्रौद्योगिकसंस्थानाय साहाय्यं मेलिष्यति। असौ अग्रे अवोचत् यत् कृत्रिममेधाया: परिवर्तनकारिण्या: शक्ते उपयोगाय छात्राणां सज्जिकरणे एकां महत्वपूर्ण-भूमिकां निर्वक्ष्यति।

## हज-आवेदनम्

आगामि-वर्षाय हजयात्रायै आवेदनानां स्वीकृतय: समारब्धा:, जना: सितम्बरमासस्य नवमदिनाङ्कं यावत् आवेदनं कर्तुं शक्ष्यन्ति। अल्पसंख्यकसम्बद्धमन्त्रिणा किरेनरिजिजू इत्यनेन विभागस्य राज्यमन्त्रिणा जॉर्जकुरियन् इत्यनेन साकं प्रोक्तं यत् सउदी-अरबदेशेन भारताय पादोन-द्विलक्षजनेभ्य: हजयात्रानुमति: दत्तास्तीति। आवेदनानि 'हजसुविधाऐप' इत्यस्मिन् सन्ति आकारिता:।

## जापान-प्रधानमन्त्री

जापानदेशस्य प्रधानमन्त्री फुमियो किशिदा इत्येष: अद्य वार्ताहरान् समाहूय उक्तवान् यत् स: पुनर्निर्वाचने न प्रातिभाग्यं करिष्यतीति। तेन अग्रे एतदपि उक्तं यत् लिबरल्-डेमोक्रेटिक-पार्टीतिदलस्य पुनरारम्भस्य आवश्यकता अस्ति। एकविंशत्यधिक-द्विसहस्रतमवर्षात् प्रधानमन्त्रि पदात् किशदा इत्यस्य निर्णयेन दलकार्यकर्तार:, प्रशंसकाश्च आश्चर्यचकिता: सन्ति।

## थाईलैण्ड-प्रधानमन्त्री-निरस्त:

थाईलैण्डदेशस्य सांविधानिकाभिकरणेन प्रधानमन्त्री स्रेत्था-थाविसिन् इत्येष: पदात् निरस्तीकृत। यतो हि प्रधानमन्त्री कार्यालयेन षोडशवर्ष-पूर्वं कारावासदण्डप्राप्त: अधिवक्ता केन्द्रीयमन्त्रिमण्डले स्वीकृत: आसीत्। चत्वारिंशदधिकै: थाई-सासदै: मुख्यन्यायालये प्रधानमन्त्रिणं विरुध्य नैतिकाधारेण त्यागपत्रम् अपेक्षितमासीत्।

।। इति वार्ता:।।